International Journal of Sanskrit Research 2025; 11(5): 319-322

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(5): 319-322
© 2025 IJSR
www.anantaajournal.com
Received: 13-08-2025
Accepted: 16-09-2025

**Sri Ujjwal S**
Assistant Professor, Department of Vyakarana, Central Sanskrit University Guruvayur Campus, Kerala, India

**Corresponding Author:**
**Sri Ujjwal S**
Assistant Professor, Department of Vyakarana, Central Sanskrit University Guruvayur Campus, Kerala, India

# शाब्दबोध-प्रतिपत्तौ भाष्याभिप्रेतः कर्तृत्वविमर्शः "ब्रह्मसूत्र-शाङ्करभाष्यं, महाभाष्यं च"

## Sri Ujjwal S

**सारांश**

कर्तृत्वन्नाम कर्तुः भावः तस्मिन् कर्तरि वर्तमानः कश्चित् धर्मः। आश्रयत्वसम्बन्धेन कर्तरि वर्तते कर्तृ इति प्रातिपदिकस्य सामान्यतः यौगिकः अर्थः भवति करोती इति कर्ता। शास्त्रेषु दर्शनेषु च बहुश्रुतः अयं कर्तृशब्दः बहुधा विभिन्नैः दार्शनिकैः बहुभिः प्रकारैः व्याख्यातो वर्तते। लक्षणान्यपि तद्विषये प्रणीतानि सन्ति।तत्रापि भूषणसारादिषु ग्रन्थेषु सम्यक् कर्तृत्वविचारः कृतो वर्ततेम पाणिनिना अपि कर्तृबोधकं कर्तृत्वबोधकं सूत्रं प्रणीतम्।भाष्यकारेण पतञ्जलिना अपि निरूपणम् एतद्विषये कृतमस्ति। एवं मञ्जूषादिषु व्याकरणग्रन्थेषु चर्चितञ्च वर्तते। ब्रह्मसूत्रे भाष्ये अपि कर्तृत्वविरोधः परिहृतः कर्ताशास्त्रार्थवत्वादित्यादिसूत्रेषु। विशिष्य अत्र कारकान्तराणामपि कर्तृत्वं कथमिति विमर्शः कर्तव्यः वर्तते। तत्रापि करण-सम्प्रदान -अधिकरणादिकारकान्तराणामपि कर्तृत्वविवक्षा भवितुमर्हति। तेषामपि कर्तृतया अभिप्रेत्य प्रयोगाः कथं तत्र सम्पद्यन्ते इति तद्विषये किञ्चित् अत्र विमर्शः क्रियते। अपि च कारकान्तराणामपि कर्तृत्वस्वीकारे ब्रह्मसूत्रभाष्यविरोधो भवति वा न वा इति अयमपि अंशः अत्र विचार्यते। वैयाकारणभूषणसारे सुबर्थनिर्णयः इत्याख्ये प्रकरणे द्वितीया तृतीया चतुर्थी इत्यादिविभक्तीनां अर्थनिर्णयः कृतः सुबर्थनिर्णये विभक्त्यर्थनिरूपणार्थम् एका कारिका तत्र स्वीकृता वर्तते।

आश्रयो अवधिरुद्देश्यः सम्बन्धशक्तिरेव वा।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।

इति तत्र द्वितीयातृतीयासप्तमीनाम् आश्रयः अर्,थः उद्देश्यः चतुर्थ्यर्थः, अवधिः पञ्चम्यर्,थः सम्बन्धः षष्ठ्यर्,थः इति यथायथं भाष्यानुसारम् अयम् अर्थः अनया कारिकया प्राप्तुं शक्यते। तत्र तृतीयार्थः इदानीं विमृश्यते। कर्तृकरणयोस्तृतीया इति सूत्रेण कर्तरि करणे च अर्थे तृतीया इति विभक्तिः कर्तृकर्णयोस्तृतीया इति सूत्रेण विधीयते। अर्थात् कर्तरिवाच्ये करणे च वाच्ये तृतीया इति विभक्तिः तत्र प्रयुज्यते। एवंञ्च कर्तरिविहितायाः तृतीयायाः एवं करणार्थे विहितायाः तृतीयायाश्च आश्रयः इति अर्थः ज्ञातव्यम् इति कारिकया ज्ञायते। प्रकृते उभयोरप्यर्थयोः विषये कथं तृतीयायाः आश्रयार्थकत्वं ?कथं कारकान्तराणां च कर्तृत्वविवेचनम्? इत्यादिविचाराः अत्र उपपाद्यन्ते।
तत्र कर्तृत्वं केषाम् इति विषये विप्रतिपत्तिरस्ति। शास्त्रेषु तत्र चेतनादीनामेव कर्तृत्वं वक्तव्यं कृत्याश्रयत्वात् इति नैययिकमतम्। एवं भावनाश्रितत्वात् चेतनादीनामेव कर्तृत्वमिति मीमांसकादीनां मतम्। वैयाकरणानां मते तु न केवलं चेतनादीनां कर्तृत्वम् अर्थात् क्रियायाः आश्रयाः कर्तारः भवन्ति अपि तु अचेतनादीनि स्थाल्यादीनि अपि कर्तारो भवन्ति.
यतः स्थाली पचति, काष्ठानि पचन्ति, तण्डुलः पचते स्वयमेव, इत्यादि प्रतीतिबलात् कारकान्तराणामपि कर्तृत्वं व्याख्यातुम् अत्र इष्टम् अस्ति।

तर्हि तेषां प्रयोगाणां साधुत्वं कथम् इति विषयेपि प्रयोगाणां साधुत्वान्व्याख्यानमपि अस्य लेखनस्य मुख्यमुद्देश्यम्।

**कूटशब्दः** शाब्दबोधः, इतर अनधीनत्वम्, आश्रयार्थकत्वम्, अनन्यलभ्यः शब्दार्थः, व्यापाराश्रयत्वम्

## प्रस्तावना

सम्प्रति तृतीयायाः आश्रयार्थकत्वं कथम् इति विषये विचारः प्रस्तूयते।
तत्र कर्तृतृतीयायाः अपि आश्रयार्थकत्वं कर्तव्यम्। एवं करणे विहितायाः तृतीयायाः अपि आश्रयार्थकत्वं व्यवस्थापनीयमस्ति।
तत्र प्रथमं कर्तृतृतीयायाः आश्रयार्थाकत्वं कथम् इति विचारः।
कर्तृकर्णयोस्तृतीया इति पाणिनिसूत्रबलात् कर्तरि वाच्ये करणे वाच्ये च तृतीया विभक्तर्विधीयते। तस्मात् कर्तृकारकं करणकारकञ्च तृतीयाविभक्तेरर्थः इति सामान्यतः सूत्रमर्यादया ज्ञायते।
तर्हि ग्रन्थकृता अपि कर्तृकरणे तृतीयार्थे इति वक्तव्ये आश्रयार्थकत्वं कथम् अत्र भूषणसारग्रन्थे प्रतिपादितम् इति प्रश्नः मनसि आयाति।
तर्हि कथं तृतीयायाः आश्रयार्थकत्वं सङ्गच्छते इति अधुना अत्र विचार्यते।

कर्तृकर्णयोस्तृतया इति सूत्रेण कर्ता एव तृतीया अर्थ इति ज्ञायते तत्रापि को नाम कर्ता इति प्रश्ने सूत्रान्तरं प्रणीतं स्वतन्त्रः कर्ता इति

स्वातन्त्र्याश्रयः यः भवति सः कर्ता इति लभ्यते। तत्रापि किं नाम स्वातन्त्र्यम् इति प्रश्ने लोके सामान्यतः एकविधं स्वातन्त्र्यं स्वीकृतमस्ति। प्रसिद्धम् इतर अनधीनत्वरुपं स्वातन्त्र्यम्।

तादृश इतर अनधीनत्वरूप स्वातन्त्र्यस्य स्वीकारे देवदत्तः पचति इत्यादि प्रयोगाः सामान्यतः सिद्ध्यन्ति। यतः देवदत्तः इतर अनधीनतयैव पाकक्रियां निर्वर्तयति कारणतः देवदत्तस्य कर्तृत्वं सिद्ध्यति।

अन्यानि सर्वाण्यपि कारकाणि देवदत्तं द्वारीकृत्यैव क्रियां निर्वर्तयन्ति इत्यतः देवदत्तस्यैव इतर अनधीनत्वरूपं कर्तृत्वमत्र अस्ति। अन्येषां तु इतर अधीनत्वमेव अस्ति इत्यतः स्थाली पचति एधांसि पचन्ति इत्यादि प्रयोगाः न सिध्येरन्।

परन्तु अचेतनादीनामपि कर्तृत्वं दृष्टमस्ति। रथो गच्छति, घटो भवति इत्यादिषु यतः अचेतनादिषु सर्वदा तेषाम् इतर अधीनतैव कार्यनिर्वर्तकत्वम् अस्ति इति कृत्वा इतर अनधीनत्वरूपं स्वातन्त्र्यम् अचेतनकर्तृकस्थले कदापि उपपादयितुं न शक्यते। तस्मात् कदापि स्वातन्त्र्यं तादृश अचेतनादिस्थलेषु वक्तुं न शक्यते इत्यतः घटो भवति, रथो गच्छति इति प्रयोगाः न सिद्ध्यन्ति।

अपि च एतादृशकर्तृत्वं तेषां नास्ति इत्यतः कर्तृसंज्ञा एव न स्यात्। तत्संज्ञाप्रयुक्ता या तृतीया विभक्तिः सापि न स्यात् । अभिहिते कर्तरि प्रथमा या उक्ता सा अपि न स्यात् इति दोषाः भवन्ति।

अतः पारिभाषिकं स्वातन्त्र्यम् इह शास्त्रे विवक्षितम्। स्वातन्त्र्यं नाम न तु इतर अनधीनत्वरूपं लौकिकं स्वातन्त्र्यम् अत्र शास्त्रे विवक्षितमस्ति। किन्तु प्रकृतधातूपात्तव्यापाराश्रयत्वरूपं स्वातन्त्र्यं प्रकृते इष्टमस्ति। तादृशस्वातन्त्र्यस्य स्वीकारे अचेतनकर्तृकस्थले अचेतनादीनां कर्तॄणामपि कारकत्वं कर्तृत्वं स्वरसतया सिद्ध्यति।

तथा च रथो गच्छति इत्यादौ रथादीनाम् इतर अधीनतया कार्यनिर्वर्तकत्वम् अस्ति चेदपि प्रकृतधातूपात्त गमनरुपव्यापाराश्रयत्वात् रथो गच्छति इत्यादि प्रयोगः निर्बाधः एव।

अतः रथस्यापि कर्तृसंज्ञा तत्प्रयुक्ता विभक्तिरपि सिध्यति इति न कश्चित् अत्र दोषः जायते।

तथा च पारिभाषिकस्वातन्त्र्याश्रयणेन व्यापाराश्रयः कर्ता इति अर्थः लब्धः। तत्र व्यापारांशस्य धातुना एव लाभात् पुनः प्रत्ययस्य तस्मिन् अर्थे शक्तिः न कल्प्यते। अनन्यलभ्यः शब्दार्थ इति न्यायात्। यश्च अर्थः प्रमाणान्तरेण अवगतः तः सः तत् शब्दस्य शक्यार्थः भवितुं नार्हति यश्च अर्थः प्रमाणान्तरैरव अनवगतः स एव अर्थः तत् शब्दस्य शक्यार्थत्वेन स्वीकर्तुं शक्यते। प्रकृते व्यापाराश्रयः कर्ता इति स्वातन्त्र्यस्य यद् लक्षणम् उक्तं तत्र व्यापारांशस्य धातुना एव लाभात् तत्र तदा आश्रयमात्रम् अनेन व्यवस्थाप्यते तस्मात् आश्रयार्थकत्वं तृतीयायाः इति सिद्ध्यति। अतः सूत्रेण सः विरोधः नास्ति ग्रन्थकृतापि आश्रयार्थकत्वं व्यवस्थापितं सूत्रमर्यादयापि आश्रयार्थकत्वं तृतीयाविभक्तेर्लभ्यते इति कारणतः न अत्र सूत्रविरोधः।

सम्प्रति कारकान्तराणामपि कर्तृत्वं कथं सम्भवतिति सः अंशः निरूप्यते।

तृतीयायाः आश्रयार्थकत्वस्वीकारसमनन्तरं कारकान्तराणां कर्तृत्वं कथं सिद्ध्यति इति अनयोरर्मध्ये का सङ्गतिः इति चेत् तत्र उच्यते

घटो भवति रथो गच्छति इत्यादि अचेतनकर्तृकस्थलेषु घटादीनाम् अचेतनादीनां कर्तॄणां कर्तृत्वसिद्ध्यर्थं पारिभाषिकं स्वातन्त्र्यं स्वतन्त्रः कर्ता इति सूत्रे स्वातन्त्र्यपदेन स्वीकृतमिति एतावता प्रतिपादितम्।

तावता एव स्वयं कारकान्तराणामपि कर्तृत्वं सिद्ध्यति तद्यथा

देवदत्तः स्थाल्यां काष्ठैस्तण्डुलं पचति इत्यत्र देवदत्तस्तावत् कर्त्रकारकं। स्थाली तावत् अधिकरणकारकं। काष्ठानि अधिकरणकारकाणि।

काष्ठानि करणकारकाणि। तण्डुलं कर्मकारकम् इति व्यवस्था। सर्वेष्वपि अत्र कारकेषु देवदत्तस्यैव क्रियानुकूलकृतिमत्वं सम्भवति इति कारणतः देवदत्तस्यैव कर्तृत्वं सिद्धम्। अन्येषां कारकाणां तावत् देवदत्तं द्वारीकृत्य तदधीनतया क्रियानिर्वर्तकत्वम् अस्ति इति कारणतः तेषां कर्तृत्वं न स्यात्।

परन्तु शास्त्रे तावत् पारिभाषिकं स्वातन्त्र्यं स्वीकृतमिति कृत्वा तेषामपि अचेतनादीनां कर्तृत्वं सिद्धति। परन्तु यन्निष्ठः व्यापारः धातुना अभिधीयते तदा धातूपात्तव्यापाराश्रयत्वं तस्यैव कारकस्य उपपादयितुं शक्यते इति सामान्यतः कर्तृत्वम् इत्यस्य अर्थः अत्र भवति। सः एव स्वातन्त्र्याश्रयः कर्ता इत्यनेन अत्र अभिधीयते।

यथा देवदत्तः तण्डुलं स्थाल्यां काष्ठैः पचति इति प्रयोगे प्रतिपदम् अत्र कारकम् उपपादयितुं शक्यते।

अत्र प्रतिकारकं काचित् क्रिया भवति यया क्रियया पाकक्रिया अत्र निर्वर्तयितुं शक्या भवति।

अत्र देवदत्तः स्थाल्यां काष्ठैस्तण्डुलं पचति इत्यत्र स्थाल्यां धारणरूपः व्यापारः, धारणानुकूलः व्यापारः कश्चित् तत्र वर्तते।

काष्ठैः पचति इति प्रयोगात् ज्वलनानुकूलव्यापारः अपि काष्ठेषु वर्तते। यदा पच् धातुना स्थालीगतः धारणानुकूलः व्यापारः यदि विवक्षितश्चेत् तदानीं प्रकृतधारणरूपव्यापाराश्रयत्वं तावत् स्थाल्यां भवति इति कृत्वा स्थाल्याः कर्तृत्वं सिद्ध्यति।

यदा ज्वलनरूपव्यापारः तदनुकूलव्यापारः पच् धातुना उच्यते तदानीं प्रकृतधातूपात्तज्वलनरूपव्यापारस्तावत् काष्ठादीनामेव सम्भवति इति कृत्वा तेषामपि ज्वलनरूपव्यापाराश्रयत्वात् कर्तृत्वं सिद्ध्यति।

तदानीं कारकान्तराणां कर्तृत्व -अभिप्रायकतया एते प्रयोगाः सिध्यन्ति। स्थाली पचति। काष्ठानि पचन्ति। इत्यादि अचेतनकर्तृकप्रयोगाः अपि अत्र सिध्यन्ति।

एतादृशपारिभाषिकस्वातन्त्र्याश्रयणे कारकान्तराणां कर्तृत्वस्य साधनं यत् कृतं तस्य साधनं कृतं चेदपि सम्प्रति ब्रह्मसूत्रभाष्यविरोधः भवति। यतः एतादृश अर्थस्वीकारे एकस्यैव कर्तृत्वं एकस्यैव कर्मत्वं यश्च अधिकरणत्वेन विवक्षितं तस्यैव कर्तृत्वेन विवक्षा, यस्य कर्मत्वेन विवक्षितं, तस्य एव कर्तृत्व विवक्षा, यस्य करणत्वेन विवक्षितं, तस्य कर्तृत्वेन विवक्षा इति एकस्यैव एकस्मिन् एव धर्मिणि युगपत्कर्तृत्वकर्मत्व अधिकरणत्वादि नानाधर्माक्रान्तत्वात् नानाधर्मा आश्रितत्वात् एकस्मिन् एव धर्मिणि ते धर्माः भवितुं नार्हन्ति इति कृत्वा कर्तृत्वकरणत्वादि विरोधधर्माक्रान्तत्वात् एकस्यैव तथा अभिप्रायः अत्र वक्तुं न शक्यते।

तच्च ब्रह्मसूत्रभाष्यविरुद्धं भवति इति कृत्वा भाष्यविरुद्धम् अत्र कथम् अर्थः उपपादयितुं शक्यते। कथञ्च सूत्रकारेण अत्र भाष्यविरोधतया अर्थः प्रतिपादितः इति भाष्यविरोधः अत्र आदौ परिहर्तव्यः भवति। ततः प्राक् भाष्यस्य केन अंशेन सह विरोधः अस्ति इति आदौ ज्ञातव्यम्।

ब्रह्मसूत्रेषु अस्ति एकं सूत्रं कर्मकर्तृव्यपदेशाच्च इति सूत्रम्।

तत्र मनोमयः प्राणशरीरः भारूपः सत्यसङ्कल्पः सर्ववर्कर्मा इति श्रुतौ मनोमयशब्देन किं जीवात्मा विवक्षितो वा आहोस्वित् परमात्मनः विवक्षा क्रियते वा इति विकल्पः?

यदि जीवात्मा एव मनोमयशब्देन वाच्यः स्यात्, तर्हि एतम् इतः प्रेत्य अभिसंभविता अस्मि इत्यत्रापि एतमित्यनेन जीवात्मनः एव परामर्शः स्यात्।

सर्वनाम्नः प्रक्रान्तप्रधानपूर्वपरामरशित्वमिति न्यायेन मनोमयशब्देन जीवात्मनः एव अत्र परामृष्टत्वात् प्रकृते एतमितः प्रेत्य इति श्रुति घटक एतमिति द्वितीयान्तशब्देनापि जीवात्मनः एव परामर्शः कर्तव्यः स्यात्।

तथा च एतम् इत्यनेनापि जीवः एव परामृष्टः अभिसम्भवितास्मि इत्यनेनापि जीवः एव परामृष्टः इत्यर्थः लभ्यते।

तथा च एतमिति द्वितीयया प्राप्तिक्रिया कर्मत्वेन परामृष्टः जीवात्मा अभिसंभवितास्मि इति आख्यातेन प्राप्तिक्रियकर्तृत्वेनापि तस्यैव परामर्शः स्यात्। एकस्याः एव व्यक्तेः कर्तृत्वकर्मत्व इत्यादि विरुद्धधर्मयोः समावेशः अत्र सम्पन्नः इति आशयः विरुद्धा भवति इति कृत्वा कर्मकर्तृव्यपदेशाच्च, एकस्मिन्नेव कर्तरि कर्तृकर्मव्यपदेशः न सिध्यति इति कृत्वा तत्र मनोमयशब्देन परमात्मनः एव परामर्शः कर्तव्यः इत्यर्थः लब्धः। भाष्यग्रन्थेन

यदि मनोमयशब्देन जीवात्मा न विवक्षितः तर्हि एतमिति द्वितीयान्तपदेनापि जीवात्मनः परामर्शः न भवति परमात्मनः परामर्शात् परमात्मानम् उद्दिश्य अत्र अभिसम्भविता अस्मि इति प्राप्तिक्रिया विधीयते इति कृत्वा एकस्याः एव व्यक्तेः कर्तृत्वं कर्मत्वं चेति विरुद्धधर्मसमावेशः इति विरोधः यः उक्तः सः विरोधः परिहृतो भवति।

एते अंशाः अत्र ब्रह्मसूत्रभाष्येषु दृष्टाः वर्तन्ते।

प्रकृते तस्य भाष्यस्य अस्माभिरुक्तस्य च कःसम्बन्धः इति प्रश्नः तिष्ठति।

विरोधस्वरूपम् अस्ति -

एकस्याः एव व्यक्तेः कर्मकर्तृव्यपदेशाच्च इति सूत्रेण मनोमयशब्देन यदि जीवात्मनः परामर्शः स्यात्, तर्हि एतमित्यनेनापि जीवात्मनः एव परामर्शः कर्तव्यः। तथा सति तस्यैव तस्याः एव व्यक्तेः कर्तृत्वं कर्मत्वं चेति विरुद्धधर्मद्वयसमावेशः स्यात् इति कृत्वा कर्मकर्तृव्यपदेशाच्च इति सूत्रेण जीवात्मनः अत्र ग्रहणं भवितुं नार्हति इति अंशः ज्ञायते। किन्तु अत्र तावत् ग्रन्थकारेण अयमर्थः उक्तः एकस्याः एव व्यक्तेः कर्तृत्वमपि वक्तुं शक्यते। कर्मत्वमपि वक्तुं शक्यते, इति कारकान्तराणामपि कर्तृत्वविवक्षा अत्र क्रियते। भाष्ये तावत् एकस्याः एव व्यक्तेः धर्मद्वयं भवितुं नार्हति इति अंशः लभ्यते इति कृत्वा अस्माभिरुक्तस्य च अंशस्य तेन सह विरोधः अस्ति इति कारणतः कथमत्र कारकान्तराणां कर्तृत्वं विरोधे सति भाष्यविरोधे सत्यपि स्वीकृतमस्ति इति प्रश्न। विरोधस्य स्वरूपम्।

तस्मात् ब्रह्मसूत्रभाष्येण सह विरोधपरिहारार्थं कारकान्तराणां कर्तृत्वं वैयाकरणैः कथं स्वीकृतं? स्वीकर्तुं न शक्यते खलु इति प्रश्नस्य सारः?

कथं कारकान्तराणां कर्तृत्वव्यवस्थापनं कथम् इति प्रश्नः तथैव अवतिष्ठते।

कर्मकर्तृव्यपदेशाच्च इति ब्रह्मसूत्रे एकस्मिन् एव धर्मिणि अथवा एकस्याः एव व्यक्तेः कर्तृत्वं कर्मत्वं चेति धर्मद्वयसमावेशः न भवेदित्यर्थः नोक्तः। अपितु एकस्याः एव व्यक्तेः कर्तृत्वकर्मत्वयोः सतोः कर्तृत्वप्रयुक्ता कर्तृसंज्ञा कर्तव्या वा कर्मत्वप्रयुक्ता कर्मसंज्ञा कर्तव्या वा इति विप्रतिषेधः स्यात्।

तथा सति परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् एतमित्यत्र कर्मसंज्ञाप्रयुक्ता द्वितीया न स्यात्। यदा एकस्मिन् काले आकडारादेका संज्ञा इति कृत्वा एककालावच्छेदेन एकस्याः एव संज्ञायाः प्रयोगः वक्तव्यः इति कृत्वा कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् एतमिति द्वितीया न स्यात् इति दोषः।

यदि कर्तृत्वप्रयुक्तकर्तृसंज्ञा एव जीवात्मनि स्यात् तर्हि कर्मत्वप्रयुक्त या द्वितीया सा न स्यात् इति कृत्वा परया कर्तृसंज्ञया अत्र कर्मसंज्ञायाः बाधात् तत्प्रयुक्ता द्वितीया विभक्तिरपि न स्यात् इति आशयः।

तथा सति एतमिति द्वितीया न सङ्गच्छेत् इति कृत्वा दोषः, विरोधस्य स्वरूपम् उक्तम्।

इत्येतावन्मात्रं भाष्यकाराणाम् अत्र शङ्कराचार्याणाम् आशयः वर्तते। न तु एकस्मिन्नेव धर्मिणि कर्तृत्वं कर्मत्वं चेति धर्मद्वयं वक्तुं शक्यते इति तस्मिन् अंशे भाष्यकाराणाम् अत्र विरोधः नास्ति। एकस्याः अपि व्यक्तेः कर्तृत्वं कर्मत्वं चेति धर्मद्वयं भवति चेदपि तत्प्रयुक्ता विभक्तर्न स्यात् इति मात्रं दोषः। न तु तयोः कर्तृत्वकर्मत्व इत्यनयोः धर्मयोः समावेशे अत्र विरोधः

तस्मात् कारकान्तराणामपि कर्तृत्वं स्वीकृतं चेदपि ब्रह्मसूत्रभाष्यविरोधः नास्ति इति कृत्वा स्थाली पचति ,काष्ठानि पचन्ति इत्यादि अचेतनकर्तृकप्रयोगाः अपि इष्टतया स्वरसतया च सिद्ध्यन्ति।

एतावता कर्तृस्वरूपं किं? तृतीयायाः आश्रयार्चकत्वंञ्च कथं? कारकान्तराणामपि कर्तृत्वं कथम्? अचेतनकर्तृकस्थलेषु कथमत्र शाब्दबोधः वर्णनीयः? कारकान्तराणामपि कर्तृत्वस्वीकारे कथं ब्रह्मसूत्रभाष्येण सह विरोधः? भाष्यस्य आशयः कः? विरोधस्य वारणं कृतम्। इति एते अंशाः अनेन भागेन उपपादिताः।

एवंभूतः कर्ता त्रिविधः प्रकीर्तितः। इति शास्त्रे उक्तं

शुद्धकर्ता, प्रयोजककर्ता, कर्मकर्ता चेति तत्र -

शुद्धः कर्ता नाम स्वतन्त्रः कर्ता इति सूत्रेण प्रतिपादितः यः कर्ता स एव अत्र शुद्धकर्ता इत्यनेन विवक्षितः च्छा चैत्रेण पच्यते इत्यत्र चैत्रस्य कर्तृत्वम्।

यः धातूपात्तव्यापाराश्रयं कर्तारं स्वक्रिया-उद्दिष्टे कर्मणि प्रयोजयति प्रेरयति सः भवति प्रयोजककर्ता। यथा कृष्णः गोपं गोकुलं गमयति इति उदाहरणम् अत्र कृष्णः गोपं गोकुलगमने प्रेरयति इति कृत्वा स्वकर्मणि गमनकर्मणि गोपं प्रेरयति इति कृत्वा गोकुल गोकुलोद्देश्यक गमनरूपव्यापारस्तावत् कृष्णस्य इष्टः तादृशव्यापारं साधयितुं गोपं प्रेरयति इति कारणतः अत्र प्रयोजकरूपव्यापारश्रयत्वात् कृष्णस्य कर्तृत्वं

सिद्धति। स एव प्रयोजककर्ता इत्यनेन उच्यते।

तत्र तत्प्रयोजको हेतुः इत्यनेन अस्य हेतुसंज्ञा भवति।

तृतीयं भवति कर्मकर्ता इति कर्मकारकस्यैव कर्तृत्वेनविवक्षा यदा भवति तदानीं सः कर्मकर्ता इति व्यवह्रियते तथैव कर्मकर्तृ इत्यपि व्यवह्रीयते। यथा तण्डुलस्य विकृल्त्तेरेव धात्वर्थव्यापारत्वेनैव लक्षणे तादृशविकृल्त्तिरुव्यापाराश्रयत्वं स्वयं तण्डुलेषु दृश्यते इति कारणतः तण्डुलादीनामपि कर्तृत्वं सिध्यति।

कर्मकर्तृ इति व्यवहारं च प्राप्नोति। तण्डुलः कर्मकर्तृ । तण्डुलः पच्यते स्वयमेव इत्यादि प्रयोगाः अपि सिद्ध्यन्ति।

तावता कृर्तृतृतीयायाः विषये सामान्यतः वैयाकरणैः अभिप्रेतः विचारः अत्र निरूपितः अस्ति।

सम्प्रति करणतृतीयायाः आश्रयार्थकत्वं कथं सिद्ध्यति इति अयमपि अंशः विचार्यते। साधकतमं करणम् इति सूत्रेण करण संज्ञा पाणिनिना उक्तः अस्ति। कारकेषु यत् साधकतमं भवति तदेव कारकं करणं भवति इति सूत्रस्य अर्थः। साधकतमम् इत्यत्र तमप् घटितप्रयोगेण कारकान्तराणाम् अपेक्षया अस्य कश्चित् उत्कर्षः ज्ञायते। तस्य उत्कर्षातिशये ज्ञाते सत्येव तत्र तमप् प्रत्ययस्य अर्थः सङ्गच्छते इति कृत्वा कारकेषु यः उत्कृष्टतरः भवति स एव अत्र करण इति शब्देन ग्राह्यः भवति इति अर्थः।

सर्वाण्यपि कारकाणि स्वस्वक्रियाद्वारा व्यापारं जनयन्त्येव स्थाली अपि धारणानुकूलव्यापारद्वारा क्रियां जनयन्ति काष्ठान्यपि ज्वलनानुकूलव्यापारद्वारा क्रियां जनयन्ति इति कृत्वा सर्वाण्यपि कारकाणि स्व स्वव्यापारद्वारा क्रियां जनयन्त्येव।

किन्तु तावत्सु सर्वेषु कारकेषु सत्स्वपि यत्कारकगत अव्यवहितोत्तरव्यापारजन्यं फलं जायते,यत्कारकगत यत्कारकगतव्यापाराव्यवहितोत्तरं फलम् उत्पद्यते,

अव्यवहितप्राक्षणे फलजनकव्यापारवत्वं हि उत्कर्षः। तादृश उत्कृष्टकारकमेव करणमिति संज्ञां प्राप्नोति। यथा रामेण बाणेन हतो वालि इत्यस्मिन् उदाहरणे बाणगतव्यापारः शरीरस्य द्वैधीभावसम्पादनानुकूलो व्यापारः। तदनन्तरमेव प्राणवियोगरूपं फलं निष्पद्यते। इति फलाव्यवहितप्राक्षणवृत्ति व्यापाराश्रयत्वं बाणस्य वर्तते इति कृत्वा बाणस्य उत्कर्षात् कारकान्तराणाम् अपेक्षया उत्कृष्टत्वं तावत् बाणे एव ज्ञायते इत्यतः बाणस्यैव करणसंज्ञा तत्प्रयुक्ता तृतीया विभक्तिः एवं बाणेन इति सिद्ध्यति ।

अत्र किं प्रमाणमिति प्रश्ने हरिकारिका अत्र प्रमाणत्वेन स्वीक्रियते। कारिका इत्थं वर्तते।

> क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम्।
> विवक्षित यदा यत्र करणं तत् तदा स्मृतम्॥

यद्व्यापारादनन्तरं क्रियायाः परिनिष्पत्तिर्जायते इति विवक्ष्यते इति विवक्षारुपेण अत्र तदा तत्करणत्वेन स्मृतम् इति कारिकायाः अर्थः।

एतावता करणतृतीयायाः अपि आश्रयार्थकत्वं कथं व्यवस्थाप्यते इति चेत् यथा उक्तम् करणं नाम फलाव्यवहितव्यापार -आश्रयत्वमिति प्रतिज्ञातम् । फलाव्यवहितव्यापाराश्रयत्वं करणत्वं चेत् पूर्वोक्तरीत्यैव अत्र

अनन्यलभ्यः शब्दार्थः इति न्यायेन व्यापारांशस्य धातुनैव लाभात् व्यापारांशं परित्यज्य केवलं तृतीयया आश्रयमात्रम् अर्थः इति पर्यवस्यति। अतः सूत्रविरोधो नास्ति। कर्तृतृतीयायाः यतः आश्रयार्थकत्वं व्यवस्थापितं , तद्वत्करणतृतीयायाःअपि आश्रयार्थकत्वम् अत्र ज्ञातम्।

यद्व्यापारादनन्तरं क्रियायाः परिनिष्पत्तर्भवति तत्कारकमिति हृद्गतः अर्थः कारिकायाः अयं न । वस्तुतः,अपि तु यद्व्यापारादनन्तरं क्रियायाः परिनिष्पत्तिः विवक्षितमिति विवक्षितांशे अत्र तात्पर्यम् अस्ति।

कारकान्तराणामपि यदि तद्गतव्यापारानन्तरं पनिष्पत्तिः विवक्ष्येत तर्हि तस्यापि करणत्वं सिद्ध्यति इति अस्माद्भागात् लभ्यते। यथा कारकान्तराणां कर्तृत्वं प्राक् प्रतिपादितं तद्वत् कारकान्तराणां करणत्वमपि प्रतिपादयितुं शक्यते इति अर्थः अस्माद् ग्रन्थाद् लभ्यते।

> अमुमेव अंशं कारिकान्तरेण अत्र प्रदर्शयति।
> वस्तुतस्तद्निर्देश्यं न हि वस्तु व्यवस्थितम्।
> स्थाल्यापच्यते इत्येषा विवक्षा दृश्यते यतः॥

यथा स्थाल्या पचति इति अधिकरणस्यापि कारकस्य करणत्वविवक्षा यतः दृश्यते, अतः अधिकरणम् इति यदस्ति तदनिर्देश्यम् इदमि इत्थम् अधिकरणमेव इति वक्तुं न शक्यते। अनेन वाक्यपदीयश्लोकेनापि स्पष्टीक्रियते यत् कारकान्तराणामपि कर्तृत्वं करणत्वम् इष्टमस्ति इति।

कथमत्र ब्रह्मसूत्रभाष्यविरोधः इति प्रागुक्तक्रमेणैव अत्रापि किञ्चित् उच्यते ब्रह्मसूत्रे एकत्र कर्ताशास्त्रार्थवत्वात् इति सूत्रे विचारः दृष्टः।

तत्र जीवः कर्ता वा अहोस्वित् बुद्धिः कर्त्री वा इति सन्देहवारणार्थं सूत्रमिदं प्रवृत्तं कर्ताशास्त्रार्थत्वाय सूत्रं जीवः एव कर्ता नतु बुद्धिः कर्त्री इति प्रतिपादनार्थं सूत्रम् आरब्धम्।

तत्काले एव शक्तिविपर्ययत् इति सूत्रान्तरमपि आरब्धम्।

तत्सूत्रस्य अयमर्थः यदि विज्ञानपदवाच्यायाः बुद्धिः कर्त्री स्यात्

तदा विज्ञानपदवाच्यायाः बुद्धेः करणत्वेन श्रुतौ व्यवहारदर्शनात् सा शक्तिर्नश्येत इति कर्तृत्वप्रयुक्ता कर्तृशक्तिरेव भवेदिति तस्य आशयः तस्मात् बुद्धेः करणत्वमेव वक्तव्यं न तु कर्तृत्वम् अन्यथा कर्तृत्वशक्तेः नाश स्यात्।

बुद्धेरपि कर्तृत्वं यदि स्वीक्रियेत तर्हि श्रुतौ क्लृप्तायाः करणत्वशक्तेः नाशः स्यात्। तस्मात् तस्य नाशायोगात् कर्तृत्वं तस्य नैव अङ्गीकर्तव्यं ,तस्मात् जीव एव कर्ता न तु बुद्धिः इति तत्सूत्रभाष्यस्य च अर्थः इति ज्ञायते। इदानीमेव कारकान्तराणामपि कर्तृत्वं यथा स्वीकृतं विवक्षाबलात् कारकान्तराणां करणत्वविवक्षापि कर्तुं शक्यते इति इदमिदानीं व्याकरणग्रन्थेन अर्थः अस्माभिः स्वीकृतः। किन्तु कर्तृत्वस्वीकारे करणत्वमपि भवतु कः दोषः इति चेत् तस्य नाशः अपि कुतः स्यात् इति प्रश्ने एवं करणत्वनाशापत्तिभिया भाष्यकृता सूत्रकृता च बुद्धेः कर्तृत्वं नैव स्वीकर्तव्यम् इति उक्तम् अस्मात् भाष्यविरोधेन कारकान्तराणां करणत्वं नास्ति इति भवति कारकान्तराणां करणत्वं नास्ति इति यदि उच्यते तदानीं भाष्याशयः सङ्गच्छते।

## निष्कर्ष

वैय्याकरणैः कारकान्तराणां करणत्वं वक्तुं शक्यते इति उक्तम्। भाष्येण स्वीकर्तुं न शक्यते इति प्रतिपादितम् तर्हि कथमत्र भाष्यविरोधः अत्र परिह्रियते?

शक्ति विपर्ययात् इति सूत्रेण कर्तृत्वशक्तिस्वीकारे करणत्वशक्तेः नाशस्यादिति तदर्थं करणत्वशक्तिः भवतु इति।

तदैव एतेषां प्राणानां विज्ञानेन विज्ञानमादयः इति श्रुतौ विज्ञानेति तृतीयया क्लृप्ता या करणत्वशक्तिः तस्याः शक्तेः नाशः स्यात्। तां शक्तिं परित्यज्य कर्तृत्वशक्तिः किमर्थं कल्पनीया इत्येव भाष्यकृतः अभिप्रायः। नतु अत्र करणत्वशक्तेः नाशः स्यादि इति क्लृप्ता या शक्तिः तां शक्तिं परित्यज्य शक्त्यन्तरस्वीकारार्थं किमर्थम् अत्र अनुधावनं क्रियते इत्येतावन् मात्रं भाष्यगतः आशयः।

1. अतः बुद्धेः कर्तृत्वं वा कारणत्वं वा इति विचारे करणत्वशक्तिः क्लप्ता अस्ति तां परित्यज्य कर्तृत्वशक्तिः न स्वीकर्तव्या इत्येव भाष्यगतः अर्थः। न तु कारकान्तराणाम् अत्र करणत्वं सम्भवति इति अर्थः। तस्मात् प्रकृते एकस्यैव कारकस्य कर्तृत्वमपि भवितुम् अर्हति। करणत्वमपि भवितुमर्हति।

## सन्दर्भ सूची


1. भूषणसारः - कौण्डभट्टः
2. महाभाष्यम् - पतञ्जलिः
3. ब्रह्मसूत्रम् - शाङ्करभाष्यम्
4. वाक्यपदीयम् - भर्तृहरिः
5. परमलघुमञ्जूषा - नागेशभट्टः